# ROLL DESCRIPTIONS

| | |
|---|---|
| ROLL NO. WITH CENTRE CODE 0010490 | DATE OF FILMING 06-08-92 |

NAME OF THE CENTRE/COLLECTION: Saraswati Bhawan Library, Varanasi

DETAILS OF CATALOGUE (SUB/VOL.): Veda.

| | |
|---|---|
| LANGUAGE: Sanskrit. | SCRIPT: Bengali; Devanagari |
| MATERIAL: Paper | TOTAL FRAMES: 600 |
| ORIGINAL FILM USED: Kodak | FOOTAGE |

## RETAKES INFORMATION

| MSS. NO. | FOLIO NO. | REMARKS |
|---|---|---|
| — | — | — |

Indira Gandhi National
Centre for the Arts

क्रम सं० १३२

विषय: कर्मकाण्ड

प्रवेश सं० 39344

ग्रन्थकार करधर:

नाम शिलान्यासप्रयोग:

पत्र सं० १-२

अक्षर सं० (पंक्तौ) ३४ पंक्ति सं० (पृष्ठे) १२

श्लोक सं०

आकार: १०.५ x ४.६

लिपि: दे.ना.

आधार: कागज

वि० विवरणम् संपूर्ण: (गृहारम्भप्रयोग: वास्तुपद्धत्यां)

सं. १९११

न. ११ / ~~२१११~~ ~~४४४~~ ४४५

बी० एस० यू० पा०—७७ एस० सी० डी०—१९७१—५० ०००

008968

Indira Gandhi National Centre for the Arts

॥श्रीगणेशाय नमः॥ अथ शिलान्यासप्रयोगः॥ कर्त्ता देशकालौ स्मृत्वा॥ करिष्यमाणस्य वास्तोः शुभ
तासिद्ध्यर्थं च भूमिपूजनं शिलान्यासं च करिष्ये॥ इति संकल्प्य॥ तदंगत्वेन गणपतिपूजनं स्व
स्तिपुण्याहवाचनं च कृत्वा आचार्यं च तथा चतुरो ब्राह्मणान्वृत्वा तान्संपूजयेत॥ अथाचार्यः
॥ यदत्र संस्थितमिति सर्षपान्विकीर्य॥ कुशोदकेन प्रोक्ष्य॥ पीठे शिलाः स्थापयेत॥ आदौ पंच
शिलाः शुद्धोदकेन प्रक्षाल्य॥ अग्निर्मूर्द्धेति मृदा प्रक्षालयेत॥ यज्ञायज्ञियेति पंचकषायैः॥
गायत्र्या गोमूत्रेण॥ मानस्तोकेति गोमयोदकेन॥ गंधद्वारां गंधेन॥ पयः पृथिव्यां पंचगव्ये
न॥ आप्यायस्वेक्षीरेणेति॥ दधिक्राव्णः दध्ना॥ घृतवती घृतेन॥ मधुवाता मधुना॥ आ
यंगोः शर्करया॥ याः फलिनी फलोदकेन॥ हविष्मतीरिमा आप इति गोशृंगोदकेन॥ ओ
षधीरिति सर्वौषधीजलेन॥ ओषधय इति धान्योदकेन॥ इमं मे गंगे इति तीर्थोदकेन॥ गं
धद्वारां गंधोदकेन प्रक्षाल्य॥ कुंकुमचंदनाभ्यां विलिप्य॥ वाससी आच्छाद्य॥ नामभिः पूज
येत॥ नामानि तु॥ नंदा भद्रा जया रिक्ता पूर्णेति॥ तासां निधिकुंभाः॥ पद्मः महापद्मः
शंखः मकरः समुद्र इति॥ अग्निं प्रतिष्ठाप्यान्वाधाने॥ रुद्रमघोरमंत्रेणाष्टोत्तरशतसंख्य
या॥ नंदा भद्रा जया रिक्ता पूर्णा चाष्टाविंशतिसंख्यया॥ पद्मादीनामेकैकाज्याहु

Indira Gandhi National
Centre for the Arts

॥भूमिं चाष्टविंशतिसंख्यया॥ शेषेण स्विष्टकृतमित्यादि आज्यभागांते प्रधानहोमं कृत्वा संपात
१ दकं गृहीत्वा दिक्पालेभ्यो बलिं दत्वा पूर्णाहुतिं ततः शिलामलमध्याग्रेषु सिंचेत॥ अथाचार्यः
खातभूमिं उपलिप्य॥ तत्र कूर्मपृष्ठोपरि स्वर्णाम्बुकुवर्णां चतुर्भुजां पृथिवीं ध्यात्वा॥ तत्रस्थां
नां पृथिवीति भूमिं कूर्मानंतौ च संपूज्य॥ भूम्यै अर्घ्यं दद्यात॥ यथा॥ आगच्छ सर्वकल्याणि
वसुधे लोकधारिणि॥ उद्धृतासि वराहेण सशैलवनकानना॥१॥ गृहाणु कारयाम्य घृतदू
र्वे शुभलक्षणे॥ गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भव॥२॥ ततो लाजासक्तुभिर्दधि
दीपसहितैर्भूम्यै बलिं दत्वा प्रार्थयेत॥ सर्वबीजसमायुक्ते सर्वरत्नौषधीवृते॥ पूजिते प
रमाचार्यैर्गंधमाल्यैरलंकृते॥ इष्टं मे त्वं प्रयच्छस्व त्वामहं शरणं गतः॥ पुत्रदा धनदायुष्यध
नवद्धिकरी भवेति नमेत॥ ततः खाते मध्यपूर्वादिक्रमेण पंचशिलास्थापयित्वा॥ ततो म
ध्यशिलोपरि अक्षतान्॥ तत्र मध्वाज्यपारदसुवर्णरत्नगर्भं गंधादिभूषितं कुंभं स्थाप
येत॥ एवं चतुर्दिक्षु चत्वारः॥ ततः मध्यकुंभे पूर्वादि महापद्मशंखक्षेमकरं समुद्रं च सं
पूज्य कुंभसमीपे नंदादिका दत्वा मध्ये पूर्णां स्थापयेत॥ यथा॥ पूर्णे त्वं सदा भद्रे सर्व सं रूम
दोरलक्षणे॥ सर्वसंपूर्णमेवात्र कुरुष्वांगिरसः सुते॥१॥ ततः पूर्वे॥ नंदे त्वं नंदिनी पुंसा १

---

त्वामत्रस्थापयाम्यहं॥ गृहेऽस्मिंस्तिष्ठ संहृष्य यावच्चंद्रार्कतारकाः॥१॥ आयुः कामं श्रियं देहि देवि
वासिष्ठनंदिनि॥ अस्मिन्गृहे सदा कार्या रक्षा वै यत्नतस्त्वयेति॥२॥ ततो दक्षिणे॥ भद्रे त्वं स
र्वदा भद्रं लोकानां कुरु काश्यपि॥ आयुर्दा कामदा देवि सुखदा त्वं सदा भव॥१॥ ततः पश्चिमे॥
जये त्वं सर्वदा देवि तिष्ठ त्वं स्थापिते मया॥ नित्यं जयाय भूत्यै च स्वामिनो भव भार्गवि॥१॥
उत्तरे॥ रिक्ते त्वं रिक्तदोषघ्ने सिद्धिबुद्धिप्रदे शुभे॥ सर्वदा सर्वदोषघ्ने तिष्ठास्मिन्नीशरू
पिणि॥१॥ इति॥ ततः परितो लोकपालान्संपूज्य॥ पूरणादिभ्यो लाजादिबलिं लोकपा
लेभ्यश्च माषभक्तबलिं दत्वा॥ विश्वकर्मणः आयुधपूजां कृत्वा॥ ब्राह्मणान्संभोज्य
॥आचार्यादिभ्यो दक्षिणां दत्वा॥ कर्मेश्वरार्पणं कुर्यात॥ इति मात्स्ये शिलान्यासविधिः
॥अथ गृहारंभः॥ वैशाखकार्तिकश्रावणमार्गफाल्गुनमासेषु तृणावस्त्रगृहारंभे दोषो
नास्ति॥ शुक्लपक्षे॥ रिक्ताऽमावास्याषष्ठीनवमीवर्जिततिथिषु॥ शनिशशिबुधगुरुशु
क्रवारेषु॥ रोहिणीमृगशीर्षपुनर्वसुपुष्योत्तराफाल्गुनीहस्तचित्रास्वात्यनुराधाज्येष्ठा
मूलोत्तराषाढाश्रवणधनिष्ठाशतभिषोत्तररेवतीषु तत्र कर्तव्यगृहं भूमौ सर्पाकारं वास्तु
परिकल्प्य तस्य क्रोडे नाभौ वास्तुखातं खनेत॥ स च वास्तुपतिर्भाद्रादिमासत्रये पूर्वशिराः

Indira Gandhi National Centre for the Arts

स्वपिति॥आग्रहायणिकमासत्रयेदक्षिणशिराःस्वपिति॥फाल्गुनादिमासत्रयेपश्चिमशि
राः॥ज्येष्ठादिमासत्रयेउत्तरशिराः॥वामेनैवपार्श्वेनशेते॥सदातत्रशिरोदेशादारभ्य
भागद्वयंत्याज्यं॥एकोभागःपुच्छदेशादारभ्यत्याज्यः॥दक्षिणभागेवास्तुखातंखनेत्॥
तच्चजलेनपूरयेत्॥तस्मिन्गर्तेस्थलेकृतस्नानादिराचांतःउपविश्य॥ॐभगव
न्गणपतेइहागच्छइहतिष्ठइत्यावाह्य॥एतानिपाद्यादीनिगंधादीनिचवास्तोष्पतयेन
मःवास्तोष्पतिंसंपूज्य॥ॐवास्तोष्पतेक्षमस्वेतिविसर्जयेत्॥ततोऽष्टौनागाःइहाग
च्छतइहतिष्ठतइत्यावाह्य॥एतानिपाद्याऽर्घ्याचमनीयस्नानीयपुनराचमनीया
नि॥तथागंधादीनिअष्टौनागेभ्योनमः॥अष्टौनागाःक्षमध्वं॥स्वस्थानेगच्छत॥
ततोधरित्रिइहागच्छइहतिष्ठइत्यावाह्य॥ॐहिरण्यगर्भेवसुधेशेषस्योपरिशायि
नि॥वसाम्यहंतवपृष्ठेगृहाणार्घ्यंधरित्रिमे॥१॥इतिपठित्वा॥पाद्यादिभिःत्रिःपू
जयेत्॥ॐधरित्रिक्षमस्वविसर्जयेत्॥ततोदधिभक्तमाषाम्रफलंचगर्तेनिक्षि
प्यगर्तंमृत्तिकयापूरयेत्॥इतिकरधरविरचितव्रतपद्धत्यांगृहारंभःसंक्षिप्तः॥



Indira Gandhi National
Centre for the Arts